चक्रुषेचिदागोवयंस्यामवरुणेऽअनागाः। अनुव्रतान्यदितेर्ऋधंतोयूयं०
॥९॥प्रशुंध्युवंवरुणायप्रेष्ठांमतिंवसिष्ठमीळ्हुषेभरस्व। यऽईमर्वांचंक
रतेयजत्रंसहस्रामघंवृषणंबृहंतं। अधान्वस्यसंदृशंजगन्वानग्ने
रनीकंवरुणस्यमंसि। स्व१र्यदश्मंनधिपाऽउऽअंधोभिमावपुर्दृशयेनि
नीयात्। आयद्रुहाववरुणश्चनावंप्रयत्समुद्रमीरयावमध्यं। अधिय

पं.
५२२

दपांस्नुभिश्चरावप्रप्रेंखईंखयावहैशुभेकं। वसिष्ठंहवरुणोनाव्याधादृषिं
चकारस्वपामहोभिः। स्तोतारंविप्रःसुदिनत्वेऽअह्नांयान्नुद्यावस्ततनन्या
दुषासः। क्व१त्यानिनौसख्याबभूवुःसचावहेयदवृकंपुराचित्। बृहंतंमा
नंवरुणस्वधावत्सहस्रद्वारंजगमागृहंतोयऽआपिर्नित्योवरुणप्रियः
संत्वामागांसिकृणवत्सखाते। मातऽएनस्वंतोयक्षिभुजेमयंधिष्माविप्रः स्तुवतेवरूथं। ध्रुवासुत्वासुक्षितिषुक्षियंतोव्य१स्मत्याशंवरुणो
मुमोचत्। अवोवन्वानाऽअदितेरुपस्थाद्यूयंपातस्वस्ति०॥१०॥ मोषुव
रुणमृन्मयंगृहंराजंनहंगमं। मृलासुक्षत्रमृलयायदेमिप्रस्फुरंनि

२५

११

वदृतिर्नध्मातोऽअद्रिवः। मृलासुक्षत्रमृलय। क्रत्वःसमहदीनताप्रती
पंजगमाशुचे। मृलासुक्षत्रमृलय। अपांमध्येतस्थिवांसंतृष्णाविद
ज्जरितारं। मृलासुक्षत्रमृलय। यत्किंचेदंवरुणदैव्येजनेभिद्रोहं
मनुष्यश्चरामसि। अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसो
देवरीरिषः॥११॥ प्रवीरयाशुचयोदद्रिरेवोमध्वर्युभिर्मधुमंतःसुता
सः। वहवायोनियुतोयाह्यच्छापिबासुतस्यांधसोमदाय। ईशाना
यप्रहुतिंयस्तऽआनट्शुचिंसोमंशुचिपास्तुभ्यंवायो। कृणोषितं
मर्त्येषुप्रशस्तंजातोजायतेवाज्यस्य। रायेनुयंजज्ञतूरोदसीमेदे

दु

जाता१

पं.
५२३

वीधिषणाधातिदेवं। अधवायुंनियुतःसश्चतस्वाऽउतश्वेतंवसुधितंनिरे
के। उछंनुषसःसुदिनाऽअरिप्राऽउरुज्योतिर्विविदुद्दीध्यानाः। गव्यंचि
हूर्वमुशिजोविवव्रुस्तेषामनुप्रदिवःसस्रुरापः। तेसत्येनमनसादी
ध्यानास्वेनयुक्तासःक्रतुनावहंति। इंद्रवायूवीरवाहंरथंवामीशान
योरभिपृक्षःसचंते। ईशानासोयेदधतेस्वर्णोगोभिरश्वेभिर्वसुभिर्हि
रण्यैः। इंद्रवायूसूरयोविश्वमायुरर्वद्भिर्वीरैःपृतनासुसह्युः। अर्वंतोन
श्रवसोभिक्षमाणाऽइंद्रवायूसुष्टुतिभिर्वसिष्ठाः। वाजंयंतःस्ववसेहु
वेमयूयं॥१२॥ कुविदंगमनसायेवृधासःपुरादेवाऽअनवद्यासऽआ

अद्धः॥

७८

सन्। तेवायवेमनवेबाधितायावासयंनुषसंसूर्येण। उशंतादूतान
दभायगोपामासश्चपाथःशरदश्चपूर्वीः। इंद्रवायूसुष्टुतिर्वामिया
नामाडीकमीट्टेसुवितंचनव्यं। पीवोऽअन्नांरयिवृधःसुमेधाःश्वेतः
सिषक्तिनियुतामभिश्रीः॥ तेवायवेसमनसोवितस्थुर्विश्वेन्नरःस्व
पत्यानिचक्रुः॥ [illegible]॥ यावत्तरस्तन्वोऽयावदोजोयावन्नरश्चक्षसादीध्या
नाः। शुचिंसोमंशुचिपापातमस्मेऽइंद्रवायूसदतंबर्हिरेदं। नियुवाना
नियुतःस्यार्हवीराऽइंद्रवायूसरथंयातमर्वाक्। इदंहिवांप्रभृतंमध्वोऽ
अग्रमधप्रीणानाविमुमुक्तमस्मे। यावांशतंनियुतोयाःसहस्रमिं

प्रवातरन्तनक्षितिं इंवायू विश्ववारा सचेनावानियतिंसुविदत्रामिरुविंसातंनरा प्रनिभृतस्य मधः अर्वतोनअवसा निह्वमाणा इंद्रवायू
सुष्टुतिर्वसिष्ठावाजयंतःस्वर्मेऽवेमयूयं॥१३॥आवायोभू
षशुचिपाऽउपनःसहस्रंनियुतोविश्ववारोउपोनेऽअंधोमघमयामिय
स्यदेवदधिवेंपूर्वेयंप्रसोतोजीरोऽअध्वरेष्ठास्तोमंमिंद्रायवायवेपि
बध्यैप्रयद्यांमधोऽअग्रियांभरंत्यध्वर्यवोदेवयंतःशचीनिःप्रयानिर्यासि
दाश्वांसमच्छानियुद्भिर्वायविष्टयेदुरोणेनोरविंसुभोजसंयुवस्वनिवा
रंगव्यमश्व्यंचराधःयेवावयंइंद्रमादनासःआदेवासोनितोशनासोऽअ
र्यःघ्नंतोवृत्राणिसूरिनिःष्यामसासत्कांसोयुधानृभिरमित्रान्नाआनोनि
युद्भिःशतिनीभिरध्वरंसरुस्मिणीभिरुपयाहियज्ञंवायोऽअस्मिन्त्सवनेमा

दयस्वयूयं॥१४॥शुचिंनुस्तोमंनवजातमद्येंद्राग्नीवृत्रहणाजुषेथांजुम्ना
हिवांसुहवाजोहवीमिताववंसतःनशतेथेष्टानासानसीशवसाना
हिनूतंसाकंवृधाशवसाशूशुवांसाहयंतोरायोयवसस्यनूरेःपृङ्क्तंवा
जस्यस्थविरस्यघर्वेःनपोहयद्दिधंवाजिनोगुथोजिर्विप्राःप्रमतिमि
च्छमानाःअर्वतोनकाष्ठांनहमाणाऽइंद्राग्नीजुह्वतोनरस्तोजीर्विप्रः
प्रमतिमिच्छमानऽईट्टेरयिंयशसंपूर्वनाजाऽइंद्राग्नीवृत्रहणासुवज्रा
नोनयेनिष्षिरतंदेह्लेःसंयन्महीमिथतीस्यईमानेतनूरुचाशूरसाताय
तैतोऽअदेवयुंविदथेदेवयुजिःसत्राहतंसोमसुताऽनेना॥१५॥इमासु

पं॰
५२५

२

षुसोमसुतिमुपनऽएंद्राग्नीसौमनसाययातं।नूचिद्धिपरिमम्नाथेऽअस्मा
नावांशश्वद्भिर्वतीयवाजैः।सोऽअग्नऽएनानमसासमिद्धोछामित्रंवरु
णमिंद्रंवोचेः।यत्सीमागश्चकृमातत्सुमृलतदर्यमादितिःशिश्रयंतु।ए
ताऽअग्नऽआशुषाणासऽइष्टीर्युवोःसचाभ्यश्यामवाजान्।मेंद्रोनोवि
ष्णुर्मरुतःपरिख्यन्यूयं॥१६॥इयंवामस्यमन्मनऽइंद्राग्नीपूर्व्यस्तुतिः।
अभ्राद्वृष्टिरिवाजनि।शृणुतंजरितुर्हवमिंद्राग्नीवनतंगिरः।ईशानापि
प्यतंधियः।मापापत्वायनोनरेंद्राग्नीमाभिशस्तये।मानोरीरधतंनिदे ८०
इंद्रेऽअग्नानमोबृहत्सुवृक्तिमेरयामहे।धियाधेनाऽअवस्यवः।ताहिशश्वं

तऽईलतऽइत्था विप्रासऽऊतये।सबाधोवाजसातये।तावांगीर्भिर्विप
न्यवःप्रयस्वंतोहवामहे।मेधसातासनिष्यवः॥१७॥इंद्राग्नीअवसाग
तमस्मभ्यंचर्षणीसहा।मानोदुःशंसऽईशत।माकस्यनोऽअररुषोधूर्तिः
प्रणङ्मर्त्यस्य।इंद्राग्नीशर्मयछतं।गोमद्धिरण्यवद्वसुयद्वामश्वावदी
महे।इंद्राग्नीतद्वनेमहि।यत्सोमआसुतेनरऽइंद्राग्नीऽअजोहवुः।सप्ती
वंतासपर्यवः।उत्छेभिर्वृत्रहंतमायामंदानाचिदागिरा।आंगूषैराविवा
सतः।ताविदुःशंसंमर्त्यंदुर्विद्वांसंरक्षस्विनं।आभोगंमन्मनाहतमु
दधिंहन्मनाहतं॥१८॥प्रक्षोदसाधायसासस्रऽएषासरस्वतीधरुणमा

प.
५२६

यसीपूः। प्रबाबधाना रथ्येव याति विश्वाऽअपो महिना सिंधुरन्याः। एका
चेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्यऽआसमुद्रात्। रायश्चेतंती भु
वनस्य पत्नी [illegible]र्घृतं पयो दुदुहे नाहुषाय। सवावृधे नर्यो योषणासु वृ
षा शिशुर्वृषभो यज्ञियासु। सवाजिनं मघवद्भ्यो दधाति विसातये
तन्वं मामृजीत। उत स्या नः सरस्वती जुषाणोपश्रवत्सुभगा यज्ञेऽ
अस्मिन्मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः। इमा
जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व। तव शर्मन्प्रियत
मे दधानाऽउपस्थेयामशरणं न वृक्षं। अयमु ते सरस्वति वसिष्ठो द्वारा

वृतस्य सुभगे व्यावः। वर्धशुभ्रे स्तुवते रासि वाजान्यूयं॥१९॥ बृहदुगा
यिषे वचो सुर्या नदीनां। सरस्वतीमिन्महया सुवृक्तिभिस्तोमैर्वसिष्ठरो
दसी। उभे यत्ते महिना शुभ्रेऽअंधसीऽअधि क्षियंति पूरवः। सा नो बोध्य
वित्री मरुत्सखा चोदराधो मघोनां। भद्रमिद्भद्रा कृणवत्सरस्वत्यकवा
री चेतति वाजिनीवती। गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत्। ज
नीयंतो न्वग्रवः पुत्रीयंतः सुदानवः। सरस्वंतं हवामहे। ये ते सरस्वऽ
ऊर्मयो मधुमंतो घृतश्चुतः। तेभिर्नो विता भव। पीपिवांसं सरस्वतस्त
नं यो विश्वदर्शतः। भक्षीमहि प्रजामिषं। यस्य व्रतं पशवो यंति सर्वे यस्य

पं॰
५२७

व्रतमुपतिष्ठंतऽआपः। यस्य व्रते पुष्टिपतिर्वर्तिष्ठंस्तं सरस्वंतमवसे हु
वेम॥२०॥ यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदंति। इंद्राय य
त्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च। आ दैव्या वृणीमहे वांसि बृहस्प
तिर्नो महऽआ सखायः। यथा भवेम मीळ्हुषेऽअनागा यो नो दाता परावतः पि
तेव। तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे। इंद्रं श्लोको महि
दिव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा। सऽआ नो योनिं सदतु प्रेष्ठो
बृहस्पतिर्विश्वयोऽअस्ति। कामो रायः सुवीर्यस्य तं दात्पर्षं नोऽअति स
श्चतोऽअरिष्टान्। तमा नोऽअर्कममृताय जुष्टमिमे धासुरमृतासः पु

निवि
नि
ता
वारो
८२

राजाः। शुचिक्रंदं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम॥२१॥ तं श
ग्मासोऽअरुषासोऽअश्वा बृहस्पतिं सहवाहो वहंति। सहश्चिद्यस्य नी
लवत्सधस्थं नभो न रूपमरुषं वसानाः। स हि शुचिः शतपत्रः स शुंध्युर्हि
रण्यवाशीरिषिरः स्वर्षाः। बृहस्पतिः सखा वैशऽऋष्वः पुरू सखिभ्यऽआ
सुतिं करिष्ठः। देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा।
दक्षाय्याय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा। इयं वां ब्रह्म
णस्पते सुवृक्तिर्ब्रह्मेंद्राय वज्रिणेऽअकारि। अविष्टं धियो जिगृतं पु
रंधीर्जजस्तमर्यो वनुषामरातीः। बृहस्पते युवमिंद्रश्च वस्वो दिव्यस्ये

यद्दधिषे प्रदिवि चावनं दिवेदिवे पीतिमिदस्य वक्षि। उत ह्रदोत मन्सा जुषाण उशन्निंद्र प्रस्थि
तान्याहि सोमान् ३

पं.
५२८

शाथेऽउत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः॥
२२॥ अध्वर्यवो रुणं दुग्धमंशुं जुहोत न वृषभाय क्षितीनां। गौराद्वेदीयाँ
ऽअवपानमिंद्रो विश्वाहेद्याति सुतसोममिच्छन्। जज्ञानः सोमं सहसे प
पाथ प्रते माता महिमानमुवाच। एंद्र पप्राथोर्वा१ंतरिक्षं युधा देवेभ्यो व
रिवश्चकर्थ। यद्योधया महतो मन्यमानान्त्साक्षामतान्बाहुभिः शाशदा
नान्। यद्वानृभिर्वृतऽइंद्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम। प्रेंद्रस्य
वोचं प्रथमा कृतानि प्रनूतना मघवा या चकार। यदेददेवीरसहिष्टमा
याऽअथाभवत्केवलः सोमोऽअस्य। तवेदं विश्वमभितः पशव्यं१ यत्पश्य

८३

सि चक्षसा सूर्यस्य। गवामसि गोपतिरेकऽइंद्र भक्षीमहि ते प्रयतस्य
वस्वः। बृहस्पते युवमिंद्रश्च वस्वो दिव्यस्येशाथेऽउत पार्थिवस्य। धत्तं
रयिं स्तुवते कीरये चिद्यूयं॥ २३॥ परो मात्रया तन्वा वृधान न ते महि
त्वमन्वश्नुवंति। उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य
वित्से। न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमाप। उद
स्तभ्नाना कमृष्वं बृहंतं दाधर्थ प्राचीं ककुभं पृथिव्याः। इरावती धे
नुमती हि भूतं सूयवसिनी मनुषे दशस्या। व्यस्तभ्ना रोदसी विष्णवे
ते दाधर्थ पृथिवीमभितो मयूखैः। उरुं यज्ञाय चक्रथुरुलोकं जनयं

पं.
५२९

ता सूर्यमुषासमग्निं। दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृत
नाज्येषु। इंद्रा विष्णू दृंहिताः शंबरस्य नव पुरो नवतिं च श्नथिष्टं। शतं
वर्चिनः सहस्रं च साकं हथोऽअप्रत्यसुरस्य वीरान्। इयं मनीषा बृहती बृहं
तो रुक्रमा तवसा वर्धयंती। ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो व
जनेष्विंद्रा वषट्ते विष्णवासऽआकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं॥
वर्द्धंतु त्वा सुष्टुतयो गिरो मे यूयं॥२४॥ नू मर्त्तो दयते सनिष्यन्यो वि
ष्णवऽउरुगायाय दाशत्। प्रयः सत्रा चा मनसा यजातऽएतावंतं न
र्यमा विवासात्। त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवया वो म

८४

तिंदाः। पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चंद्रस्य रायः। त्रिर्दे
वः पृथिवीमेषऽएतां विचक्रमे शतर्चसं महित्वा। प्र विष्णुरस्तु तवसस्त
वीयां त्वेषं ह्यस्य स्थविरस्य नाम। विचक्रमे पृथिवीमेषऽएतां क्षेत्राय वि
ष्णुर्मनुषे दशस्यन्। ध्रुवासोऽअस्य कीरयो जनासऽउरुक्षितिं सुजनिमा
चकार। प्रतत्तेऽअद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्। तं
त्वा गृणामि तवसमतव्यान्क्षयंतमस्य रजसः पराके। किमित्ते विष्णो परि
चक्ष्यं भूत्प्रयद्ववक्षे शिपिविष्टोऽअस्मि। मा वर्पोऽअस्मदप गूहऽएतद्य
दन्यरूपः समिथे बभूथ। वषट्ते विष्णवासऽआकृणोमि तन्मे जुषस्व शि

पं.
५३०

पिविष्टहव्यं।वर्द्धंतुत्वासुष्टुतयोगिरोमेयूयं०॥२५॥इतिपंचमाष्टकेषष्ठो
ध्यायः॥छ॥ ॥ॐ३म्॥तिस्रोवाचःप्रवदज्योतिरग्रायाऽएतदुह्रेमधुदो
घंमूधः।सवत्सं कृण्वन्गर्भमोषधीनांसद्योजातोवृषभोरोरवीति।योवर्ध
नऽओषधीनांयोऽअपांयोविश्वस्यजगतोदेवऽईशे।सत्रिधातुशरणंश
र्मयंसत्रिवर्तुज्योतिस्वभिष्ट्य१स्मे।स्तरीरुत्वद्भवतिसूतऽउत्वद्यथाव
शंतन्वंचक्रऽएषः।पितुःपयःप्रतिगृभ्णातिमातातेनपितावर्द्धतेनपुत्रः।ते
यस्मिन्विश्वानिभुवनानितस्थुस्तिस्रोद्यावस्त्रेधासस्रुरापः।त्रयःक्रो
शासऽउपसेचनासोमध्वःश्चोतंत्यभितोविरप्शं।इदंवचःपर्जन्यायस्वरा

८५

जेह्रदोऽअस्त्वंतरंतजुजोषत्।मयोभुवोवृष्टयःसंत्वस्मेसुपिप्पलाऽ
ओषधीर्द्देवगोपाः।सरेतोधावृषभःशश्वतीनांतस्मिन्नात्माजगतस्त
स्थुषश्च।तन्मऽऋतंपातुशरदाययूयं०॥१॥पर्जन्यायप्रगायतदिवस्पु
त्रायमीळ्हुषे।सनोयवसमिच्छतु।योगर्भमोषधीनांगवांकृणोत्यर्व
तां।पर्जन्यःपुरुषीणां।तस्माऽइदास्येहविर्जुहोतामधुमत्तमं।इलां
नःसंयतंकरत्॥२॥संवत्सरंशशयानाँगवामहनमायुर्वत्सिनीनांमं
डूकानां ब्राह्मणाव्रतचारिणः।वाचंपर्जन्यजिन्वितांप्रमंडूकाऽअवादि
षुः।दिव्याऽआपोऽअभियदेनमायन्दृतिंनशुष्कंसरसीशयानं।गवामहन

तशा३

पं.
५३१

मायुर्वत्सिनीनां मंडूकानां वग्नुरत्रासमेति। यदीमेनाँ२ऽउशतोऽअभ्यवर्षी
त्तृष्यावतः प्रावृष्यागतायां। अखूवलीकृत्यापितरं न पुत्रोऽअन्योऽअन्य
मुपवदंतमेति। अन्योऽअन्यमनुगृभ्णात्येनोरपां प्रसर्गे यदमंदिषातां। मं
डूको यदभिवृष्टः कनिक्वन्पृश्निः संपृंक्ते हरितेन वाचं। यदेषामन्योऽअन्य
स्य वाचं शाक्तस्येव वदति शिक्षमाणः। सर्वं तदेषां समृधेव पर्वयत्सुवाचो न५
वदथनाध्यप्सु॥३॥ गोमायुरेकोऽअजमायुरेकः पृश्निरेको हरितऽएकऽएषां।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदंतः। ब्राह्मणासोऽअति ८६
रात्रे न सोमे सरो न पूर्णमभितो वदंतः। संवत्सरस्य तदहः परिष्ठ यन्मंडूकाः

प्रावृषीणं बभूथ। ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वंतः परिवत्स म१
रीणं। अध्वर्यवो घर्मिणः सिष्विदानाऽआविर्भवंति गुह्या केनचित्। देवहि
तिं जुगुपुर्द्वादशस्यऽऋतुं नरो न प्रतिरंत आयुः। उपप्लवदमंडूकि वर्ष
मा वदतादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः॥४॥ इंद्रासोमा तप
तं रक्षऽआयुः उब्जतं न्यर्पयतं वृषणा तमोवृधः। पराशृणीतमचितो न्योष
तं हतं नुदेथां निशिशीतमत्रिणः। इंद्रासोमा समघशंसमभ्य१घं तपुर्य
यस्तु चरुरग्निवाँऽइव। ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं
किमीदिने। इंद्रासोमा दुष्कृतो वव्रेऽअंतरनारंभणे तमसि प्रविध्यतं। य
मिनंत्येते। संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गं। गोमायुरदादजमायु
रदात्पृश्निरदाद्धरितो नो वसूनि। गवां मंडूका ददतः शतानि सहस्रसावे प्रतिरंत आयुः॥ उ०३

पं॰
५३२

यानातः पुनरेकश्चनोदयत्तद्वामस्तुसहसेमन्युमच्छवः। इंद्रासोमावर्त्तय
तंदिवोवधंसंपृथिव्याऽअघशंसायतर्हणं। उत्तक्षतंस्वर्यं१पर्वतेभ्योयेन
रक्षोवावृधानंनिजूर्वथः। इंद्रासोमावर्त्तयतंदिवस्पर्यग्नितप्तेभिर्युवम
श्महन्मभिः। तपुर्वधेभिरजरेभिरत्रिणोनिपर्शानेविध्यतंयंतुनिस्वरं॥
५॥ इंद्रासोमापरिवांभूतुविश्वतऽइयंमतिःकक्ष्याश्वेववाजिना। यांवांहो
त्रांपरिहिनोमिमेधयेमाब्रह्माणिनृपतीवजिन्वतं। प्रतिस्मरेथांतुजयद्भि
रेवैर्हतंद्रुहोरक्षसोभंगुरावतः। इंद्रासोमादुष्कृतेमासुगंभूद्योनःकदाचि ७
दभिदासतिद्रुहा। योमापाकेनमनसाचरंतमभिचष्टेऽअनृतेभिर्वचो

भिः। आपऽइवकाशिनासंगृभीताऽअसंनस्त्वासतऽइंद्रवक्ता॥ ये
पाकशंसंविहरंतऽएवैर्वाभद्रंदूषयंतिस्वधाभिः। अहयेवातान्प्रददा र्ये२
तुसोमऽआवाददातुनिर्ऋतेरुपस्थे। योनोरसंदिप्सतिपित्वोऽअग्नेयोऽ
अश्वानांयोगवांयस्तनूनां। रिपुस्तेनस्तेयकृद्दभ्रमेतुनिषहीयतांत
न्वा३तनाच॥६॥ परःसोऽअस्तुतन्वा३तनाचतिस्रःपृथिवीरधोऽअ
स्तुविश्वाः। प्रतिशुष्यतुयशोऽअस्यदेवायोनोदिवादिप्सतियश्चनक्तं।
सुविज्ञानंचिकितुषेजनायसच्चासच्चवचसीपस्पृधाते। तयोर्यत्सत्यं
यतरदृजीयस्तदित्सोमोवतिहंत्यासत्। नवाऽउसोमोवृजिनंहिनोति

पं.
५३३

नक्षत्रियंमिथुयाधारयंतं। हंतिरक्षोहंत्यासद्वदंतमुभाविंद्रस्यप्रसि
तौशयातोयदिवाहमनृतदेवऽआसमोघंवादेवाँ२ऽअप्यूहेऽअग्ने। वि
मस्मभ्यंजातवेदोहृणीषेद्रोघवाचस्तेनिर्ऋथंसचंतां। अद्यामुरीयदिवा
तुधानोऽअस्मियदिवायुस्ततपपूरुषस्य। अधासवीरैर्दशभिर्वियूया
योमामोघंयातुधानेत्याह।७। योमायातुंयातुधानेत्याहयोवारक्षाःशु
चिरस्मीत्याह। इंद्रस्तंहंतुमहतावधेनविश्वस्यजंतोरधमस्यदीष्ट।
प्रयाजिगातिखर्गलेवनक्तमपद्रुहातन्वं१गृहमाना। वव्राँऽअनंताँऽ
अवसापदीष्टग्रावाणोघ्नंतुरक्षसऽउपब्दैः। वितिष्ठध्वंमरुतोविक्षि१छ

यऽ
व्यू
८८

तगृभायतरक्षसःसंपिनष्टन। वयोयेभूत्वीपतयंतिनक्तभिर्येवारि
पोदधिरेदेवेऽअध्वरे। प्रवर्त्तयदिवोऽअश्मानमिंद्रसोमशितंमघवंन्त्सं
शिशाधि। प्राक्तादपाक्तादधरादुदक्तादभिजहिरक्षसःपर्वतेन। एतऽ
श्व ४ उत्येपतयंतिस्वयातवऽइंद्रंदिप्संतिदिप्सवोऽदाभ्यं। शिशीतेशक्रःपि
शुनेभ्योवधंनूनंसृजदर्शिनिंयातुमद्भ्यः॥९॥ इंद्रोयातूनामभवत्पराश
रोहविर्मथीनामभ्या३विवासतां। अभीदुशक्रःपरशुर्यथावनंपात्रेवभिं
दन्त्सतऽएतिरक्षसः। उलूकयातुंशुशुलूकयातुंजहिश्वयातुमुतको
कयातुं। सुपर्णंयातुमुतगृध्रयातुंदृषदेवप्रमृणरक्षऽइंद्र। मानोरक्षोऽ

पं.
५३४

अभिनद्यातुमावतामपोछत्नुमिथुनायाकिमीदिना। पृथिवीनःपार्थि
वात्पात्वंहसोंतरिक्षंदिव्यात्पात्वस्मान्। इंद्रजहिपुमांसंयातुधानमुत
स्त्रियंमाययाशाशदानां। विग्रीवासोमूरदेवाऽऋदंतुमातेदृशन्सूर्य
मुच्चरंतं। प्रतिचक्ष्वविचक्ष्वेंद्रश्चसोमजागृतं। रक्षोभ्योवधर्मस्यतम
शनिंयातुमद्भ्यः॥९॥ अष्टमंडलं॥ ओं। माचिदन्यद्विशंसतसखायोमा
रिषण्यत। इंद्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशंसत। अवक्र
क्षिणंवृषभंयथाजुरंगांनचर्षणी। सहं। विषणंसंवननोभयंकरंमं
हिष्ठमुभयाविनं। यच्चिद्धित्वाजनाऽइमेनाना हवंतऽऊतये। अस्मा

८९

कंब्रह्मेदमिंद्रभूतुतेहाविश्वाचवर्द्धनं। वितर्तूर्यंतेमघवन्विपश्चि
तोर्योविपोजनानां। उपक्रमस्वपुरुरूपमाभरवाजंनेदिष्ठमूतये। म
हेचनत्वामद्रिवःपराशुल्कायदेयां। नसहस्रायनायुतायवज्रिवोन
शतायशतामघ॥१०॥ वस्याँ२ऽइंद्रासिमेपितुरुतभ्रातुरभुंजतः। मा
ताचमेछदयथःसमावसोवसुत्वनायराधसे। क्वेयथक्वेदसिपुरुत्राचि
द्धितेमनः। अलर्षियुध्मखजकृत्पुरंदरप्रगायत्राऽअगासिषुः। प्रास्मैर
गायत्रमर्चतवावातुर्यःपुरंदरः। याभिःकाण्वस्योपबर्हिरासदंयास
द्वज्रीभिनत्पुरः। येतेसंतिदशग्विनःशतिनोयेसहस्रिणः। अश्वासो

प॰
५३५

येते॒वृष॑णोरघु॒द्रुव॒स्तेभि॑र्न॒स्तूय॒माग॑हि। आत्वा॑घ॒सब॒र्दुघां॑ऊ॒वेगा॑य॒त्रवे॑
पसं। इंद्रं॑धे॒नुंसु॒दुघा॒मन्या॒मिष॑मु॒रुधा॑रामरं॒कृतं॑॥११॥ यत्तु॒दत्सूर॒ऽएत॑
शंवं॒कूवात॑स्य॒पर्णि॑ना। वह॒त्कुत्स॑मार्जुने॒यंश॒तक्र॑तुः॒सर॑द्गंध॒र्वमस्तृ॑तं॥
यऽऋ॒तेचि॑दभि॒श्रिषः॑पु॒राज॒त्रुभ्य॑ऽआ॒तृदः॑। संधा॑तासं॒धिंम॒घवा॑पुरू॒
वसु॒रिष्क॑र्त्ता॒विह्रु॑तं॒पुनः॑। माभू॑म॒निष्ट्या॑ऽइ॒वेंद्र॒त्वदर॑णाऽइव। वना॑नि॒
नप्र॑जहि॒तान्य॑द्रिवोदु॒रोषा॑सोऽअमन्महि। अम॑न्म॒हीद॑ना॒शवो॑नु॒ग्रा
सश्च॑वृत्रहन्। स॒कृत्सु॒तेमह॒ताशूर॒राध॒सानु॒स्तोमं॑मुदीमहि। यदि॒स्तो
मं॑म॒मश्रव॑द॒स्माक॒मिंद्र॒मिंद॑वः। ति॒रः प॒वित्रं॑ससृ॒वांसं॑ऽआ॒शवो॒मंदं॑तु

तै२

९०

त्रुग्या॒वृधः॥१२॥ आत्वा॑द्यि॒सध॒स्तुतिं॑वा॒वातुः॒सख्यु॒राग॑हि। उप॑स्तुतिर्म॒
घोनां॒प्रत्वा॑व॒त्वधा॑तेवश्मिसुष्टु॒तिं। सोता॒हिसोम॒मद्रि॑भि॒रेमे॑नम॒प्सु
धा॑वत। ग॒व्यावस्त्रे॑ववा॒सयं॑त॒ऽइन्नरो॒निर्धु॑क्षन्व॒क्षणा॑भ्यः। अध॒ज्मोऽअ
ध॑वादि॒वोबृ॑ह॒तोरो॑च॒नादधि॑। अ॒याव॑र्धस्वत॒न्वागि॒राममाजा॒तासु॑क्र
तोपृण। इंद्रा॑य॒सुम॒दिंत॑मं॒सोमं॑सोता॒वरे॑ण्यं। श॒क्रए॑णंपीपय॒द्विश्व॑या
धि॒याहि॑न्वा॒नंनवा॑ज॒युं। मात्वा॒सोम॑स्य॒गल्द॑या॒सदा॒याचं॑न॒हंगि॒रा। भू
र्णिं॑मृ॒गंनसव॑नेषुचुक्रुधं॒कईशा॑नं॒नया॑चिषत्॥१३॥ मदे॑नेषि॒तंमद॑
मु॒ग्रमु॒ग्रेण॒शव॑सा। विश्वे॑षांतरु॒तारं॑मद॒च्युतं॒मदे॒हिष्मा॒ददा॑ति

प.
५३६

नः। शेवा रेवाय पुरुदेवो मर्त्ताय दाशुषे। ससुन्वते च स्तुवते च रासते विश्वगू
र्त्तोऽअरिष्टुतः। एंद्र याहि मत्स्वचित्रेण देवराधसा। सरोनप्रास्युदरं सपी
रु तिभिरासोमेभिरुरुस्फिरं। आत्वा सहस्रमाशतं युक्ता रथे हिरण्ययै। ब्रह्म
युजो हरयऽइंद्र केशिनो वहंतु सोमपीतये। आत्वा रथे हिरण्यपे हरामयूर
शेप्या। शितिपृष्ठा वहतां मध्वोऽअंधसो विवक्षणस्य पीतये॥१४॥ पिबा त्व१
स्य गिर्वणः सुतस्य पूर्वपाऽइव। परिष्कृतस्य रसिनऽइयमासुतिश्चारुर्मदा
य पत्यते। यऽएकोऽअस्ति दंसनामहाँ२ उग्रोऽअभिव्रतैः। गमत्स शिप्रीनस्य
योषदागमद्धवं न परिवर्जति। त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य संपिणक्। त्वं भा

९१

ऽअनु चरोऽअध द्विता यदिंद्र हव्यो भुवः। मम त्वा सूरऽउदिते मम मध्यंदि
ने दिवः। मम प्रपित्वेऽअपि शर्वरे वसवास्तोमासोऽअवृत्सत। स्तुहि स्तु
ही देते घा ते मंहिष्ठासो मघोनां निंदिताश्वः प्रपथी परमज्या मघस्य मे
ध्यातिथे॥१५॥ आ यदश्वान्वनन्वतः श्रद्धया हं रथे रुहं। उत वामस्य वसु
नश्चिकेतति योऽअस्ति याद्वः पशुः। यऽऋज्रा मह्यं मामहे सहत्वचा हि
रण्यया। एष विश्वान्यभ्यस्तु सौभगा संगस्य स्वनद्रथः। अध ज्ञायो गि
रति दासदन्यानां संगोऽअग्ने दशभिः सहस्रैः। अधोक्षणो दश मह्यं
रुशंतो नला इव सरसो निरतिष्ठन्। अन्वस्य स्थूरं ददृशे पुरस्तादन

पं.
५३७

स्थऽऊरुरवरंबमाणः। शश्वतीनार्यभिचक्ष्याहसुभद्रमर्यभोजनंबिभ
र्षि॥१६॥ इत्यर्द्धः॥ इदंवसोसुतमंधःपिबासुपूर्णमुदरं। अनाभयिन्नरिमा
ते। नृभिर्द्धूतःसुतोऽअश्नैरव्योवारैःपरिपूतः। अश्वोननिक्तोनदीषु। तंते
यवंयथागोभिःस्वादुमकर्म्मश्रीणंतः। इंद्रत्वास्मिन्त्सधमादोइंद्रऽइत्सो
मपाऽएकऽइंद्रःसुतपाविश्वायुः। अंतर्देवान्मर्त्यांश्च। नयंशुक्रोनदुराशी
र्न्नतृप्राऽउरुव्यचसम्। अपस्पृण्वतेसुहार्द्दम्॥१७॥ गोभिर्य्यदीमन्येऽअ
स्मन्मृगंनव्रामृगयंते। अभित्सरंतिधेनुभिः। यत्रऽइंद्रस्यसोमाःसुतासः
संतुदेवस्य। स्वेक्षयेसुतपाव्नः। त्रयःकोशासश्चोतंतितिस्रश्चम्वाःसुपू

९२

शृणोमि। ऋक्सुपीतासोयुध्यंतेदुर्मदासोनसुरायां। ऊधननिग्नाजंरंते। रेवांइद्रेवतस्तोतास्यात्वाऽ
र्णाः। समानेऽअधेभार्म्मन्। शुचिरसिपुरुनिष्ठाःक्षीरैर्मध्यतऽआशीर्त्तः।
दध्नामंदिष्ठःशूरस्य। इमेतऽइंद्रसोमास्तीव्राऽअस्मेसुतासः। शुक्राऽआ
शिरंयाचंते॥१८॥ ताँ२ऽआशिरंपुरोळाशमिंद्रेमंसोमंश्रीणीहि। रेवंतंहित्वा
वतोमघोनः। प्रेदुहरिवःश्रुतस्य। उत्छंचनशस्यमानमगोररिराचिकेत।
नगायत्रंगीयमानम्। मानऽइंद्रपीयत्नवेमाशर्द्धतेपरादाः। शिक्षाश
चीवःशचीभिः॥१९॥ वयमुत्वातदिदर्थाऽइंद्रत्वायंतःसखायः। कण्वाऽ
उच्छेभिर्जरंते। नघेमन्यदापपनवज्रिन्नपसोनविष्टौ। तवेदुस्तोमंचि
केत। इच्छंतिदेवाःसुन्वंतंनस्वप्नायस्पृहयंति। यंतिप्रमादमतंद्राः। ओ

पं॰
५३८

षुप्रयाहिवाजेभिर्म्माहृणीथाऽअभ्य१स्मान्।महाँ२ऽइवयुवजानिः।मो
ष्व१द्यदुर्हणावान्सायंकरदारेऽअस्मत्।अश्रीरऽइवजामाता।२०॥वि
द्माह्यस्यवीरस्यभूरिदावरींसुमतिं।त्रिषुजातस्यमनांसि।आतूषिंच
कण्वमंतंनघाविद्मशवसानात्।यस्तरंशतमूतेः।ज्येष्ठेनसोतरिंद्रा
यसोमंवीरायशक्रायाभरापिबंनर्य्याय।योवेदिष्ठोअव्यथिष्वश्वावंतं
जरितृभ्यः।वाजंस्तोतृभ्योगोमंतम्।पन्यंपन्यमित्सोतारऽआधावतमद्या
य।सोमंवीरायशूराय।२१॥पातावृत्रहासुतमाद्यागमन्नारेऽअस्मत्।नि
यमतेशतमूतिः।एहहरीब्रह्मयुजाशग्मावक्षतःसखायं।गीर्भिःश्रुतंगि

र्वणसं।स्वादवःसोमाऽआयाहिश्रीताःसोमाऽआयाहि।शिप्रिन्नृषीवः
शचीवोनायमच्छासधमादम्।स्तुतश्चयास्त्वावर्द्धंतिमहेराधसेनृम्णा
य।इंद्रकारिणंवृधंतः।गिरश्चयास्तेगिर्वाहऽउत्छाचतुभ्यंतानि।स
त्रादधिरेशवांसि॥२२॥एवेदेषतुविकूर्म्मिर्वाजाँ२ऽएकोवज्रहस्तः॥
सनादमृक्तोदयतोहंतावृत्रंदक्षिणेनेंद्रःपुरूपुरुहूतः।महान्मही
भिःशचीभिः।यस्मिन्विश्वाश्चर्षणयऽउतच्यौत्नाज्रयांसिच।अनु
द्येन्मंदीमघोनः।एषएतानिचकारेंद्रोविश्वायोतिशृण्वे।वाजदावा
मघोनाम्।प्रभर्त्तारथंगव्यंतमपाकाच्चिद्यमवति।इनोवसुसहिवे

पं.
५३९

ल्हा॥२३॥ सनिता विप्रोऽअर्वद्भिर्हंता वृत्रं नृभिः शूरः। सत्यो विता विधंतम्।
यजध्वैनं प्रियमेधाऽइंद्रं सत्रा चामनसा। यो भूत्सोमैः सत्यमद्वा॥ गाथ
श्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम्। कण्वासो गातवाजिनम्। यऽऋते गा३
चिद्गास्पदेभ्यो दात्सखा नृभ्यः शचीवान्। येऽअस्मिन्काममश्रियन्। इत्था
धीवंतमद्रिवः फाण्वं मेध्यातिथिम्। मेषो भूतो३भियन्नयः। शिक्षाविभिं
दोऽअस्मै चत्वार्ययुता ददत्। अष्टापरः सहस्रा। उत सुत्येपयो वृधामा
कीरणस्य नप्त्या। जनित्वयेनामामहे॥२४॥ पिबा सुतस्य रसिनो मत्स्वा
नऽइंद्र गोमतः। आपिर्नो बोधि सधमाद्यो वृधे३स्माँ२ऽअवंतु ते धियः।

भूयामते सुमतौ वाजिनो वयं मानस्तरभिमातये। अस्मां चित्राभिरव
तादभिष्टिभिरा नः सुम्नेषु यामय। इमाऽउत्वा पुरूवसो गिरो वर्द्धंतु
यामम। पावकवर्णाः शुचयो विपश्चितोभिस्तोमैरनूषत। अयं स
हस्रमृषिभिः सहस्कृतः समुद्रऽइव प्रथो सत्यः सोऽअस्य महिमा
गृणे शवो यज्ञेषु विप्रराज्ये। इंद्रमिद्देवतातयऽइंद्रं प्रयत्यध्वरे। इंद्रं
समीके वनिनो हवामहऽइंद्रं धनस्य सातये॥२५॥ इंद्रो मह्ना रोदसी
पप्रथच्छवऽइंद्रः सूर्यमरोचयत्। इंद्रे ह विश्वा भुवनानि येमिरऽ
इंद्रे सुवानास इंदवः। अभि त्वा पूर्वपीतयऽइंद्र स्तोमेभिरायवः। स

पं॰
५४०

मीचीनासऽऋभवः समस्वरन्रुद्रागृणंत पूर्व्यम्। अस्येदिंद्रो वावृधे वृष्ण्यं
शवो मदे सुतस्य विष्णवि। अद्या तमस्य महिमानमायवोनुष्टुवंति पू
र्वथा। तत्वा यामि सुवीर्य्यं तद्ब्रह्म पूर्वचित्तये। येनायतिभ्यो भृगवे धने हि
ते येन प्रस्कण्वमाविथ। येनासमुद्रमसृजो महीरपस्तदिंद्र वृष्णि ते श
वः। सद्यः सोऽअस्य महिमानसंनशेयं क्षोणीरनुचक्रदे॥२६॥ शग्धीनः
इंद्र यत्त्वा रयिं यामि सुवीर्य्यम्। शग्धि वाजाय प्रथमं सिषासते शग्धि
स्तोमाय पूर्व्य। शग्धि नोऽअस्य यद्ध पौरमाविथ धियऽइंद्र सिषासतः। ९५
शग्धि यथा रुशमं श्यावकं कृपमिंद्र प्रावः स्वर्णरम्। कत्नव्योऽअतसी

नां तुरो गृणीत मर्त्यः। नहीन्वस्य महिमानमिंद्रियं स्वर्गृणंतऽआनशुः। क
दुस्तुवंतऽऋतयंत देवतऽऋषिः को विप्रऽओहते। कदाहवं मघवन्निंद्र
सुन्वतः कदुस्तुवतऽआगमः। उदु त्ये मधुमत्तमा गिरः स्तोमासऽईरते।
सत्राजितो धनसा अक्षितोतयो वाजयंतो रथाऽइव॥२७॥ कण्वाऽइव भृग
वः सूर्याऽइव विश्वमिद्धीतमानशुः। इंद्रं स्तोमेभिर्महयंतऽआयवः प्रियमे
धासोऽअस्वरन्। युक्ष्वा हि वृत्रहंतम हरीऽइंद्र परावतः। अर्वाचीनो मघ
वन्स्तोमपीतयऽउग्रऽऋष्वेभिरागहि। इमे हि ते कारवो वावशुर्धिया
विप्रासो मेधसातये। सत्वन्नो मघवन्निंद्र गिर्वणो वेनो न शृणुधी हवं

मू॒निरिं॑द्र वृहतीभ्यो वृ॒त्रंधनु॒भ्योऽअ॒स्फुरः॑ निरर्बु॒दस्य॒ मृग॑यस्य मा॒यिनो॒ निः
पर्व॑तस्य॒ गोऽआ॑जः॑ निर॒ग्नयो॑ रुरुचु॒र्निरु॒ सूर्यो॒ निः सो॑मऽइ॒न्द्रियो॒ रसः॑ निर॑
तरि॒क्षादध॑ मो॒ महा॒महि॑ वृ॒ष्णे तदिं॑द्र॒ पौंस्य॒म्॑ रथ॑ मे॒ दुरिं॑द्रो॒ मरु॑तः पा॒ भ
स्त्वा॒ मा॒ को॑रयाणः॑ विश्वे॑षां त्मना॒शो नि॒ष्टु॒मुपे॑वदि॒विधा॑वमान॒म्॑ रो॒हि॒तम्मे॒
पा॒ क॒स्त्वा॒ मा॒ सु॒धु॒रं क॒ स्पा॒म्॑ आ॒दा॒ऽइ॒त्यो॑ वि॒बो॒ध॒नं म्॑ यस्मा॑ऽअ॒न्येद॒शा
प्रति॑धुरं॒ वह॑न्ति॒ व॒क्रय॑न॒ऽअ॒स्नंव॒योन॑ उ॒ग्र्यम्॑ आ॒त्मापि॑तु॒स्त॒नू॒र्वासं॑ऽओजो
दा॑ऽअ॒ञ्जन॑म्॑ उ॒री॒यमिं॑द्रो॒ हि॒तस्य॒ पा॒ व॒क्र॒स्त्र॒ नं॒ भो॒ज॒दा॒तार॑म॒ब्र॒व॒म्॑ र॒ण॒
यदिं॑द्र॒ प्राग॑पा॒गुद॒ङ्ङ्॒ वा॒ हू॒यसे॒ नृभि॑ः॒ सि॒मा॒ पु॒रू॒ण्॒ यू॒तो॑ऽअ॒स्या॒ न॒ वे॒सि

प्रश॑र्धऽउ॒र्वशी॑ः॒ यद्वा॑ रु॒मे रु॑श॒मे॒ श्या॒व॒के॒ ह॒प॒ऽइ॑न्द्र॒ मा॒द॒य॒से॒ स॒चा॑ क॒ल्वा
स॒स्त्वा॒ ब्र॒ह्म॒नि॒स्तो॒म॒वा॒ह॒सऽइ॑न्द्राय॒ वृ॒त्र॒ त्याग॑हि॑ यथा॑ गो॒रो॑ऽअ॒पाँ॒ वृ॒तं
तृ॒ष्य॒न्नेत्यवे॑रिणं॑ आ॒पि॒त्वे॑ नः॒ प्र॒पि॒त्वे॒ तू॒य॒मा ग॑हि॒ क॒ण्वे॒षु॒ सु॒ स॒चा॒ पि॒ब॑॑
मं॒दं॒ऽउ॒ला॒ म॒घ॒व॒न्नि॑न्द्र॒ वो॒रा॒धो॒ दे॒या॒य॒ सु॒न्व॒ते॑॑ आ॒ मु॒ष्या॒ सो॒म॒ म॒ पि॒ब॒ श्र॒
मू॒ सु॒तं ज्ये॒ष्ठं त॒द्धि॒ ष॒ स॒हः॑ प्र च॑क्रे॒ स॒ह॒सा॒ स॒हो॒ ब॒लं॒ऽउ॒ म॒न्यु॒ मो॒ऽऊ॒ स॒॑
विश्वे॑नऽइन्द्र पृतना॒य॒वो॒ य॒हो॒ नि॒वृ॒ता॒ऽइ॒व॒ यि॒रे॒॥ २॥ स॒हस्रे॑णेव॒ स॒
च॒ते॒ य॒वी॒ युधा॑ य॒स्त॒ऽआ॒न॒लु॒प॒स्क॒ति॒मा॑ पु॒त्रं प्रा॑ व॒र्गं॑ ह॒ण॒ते॒ सु॒वी॒र्य॑॑
ओ॒ति॒न॒मं॒ऽउ॒क्ति॒भि॒ः॒ सि॒ञ्चे॒ म॒मा॒श्रं॑ मि॒ष्टो॒ य॒स्य॒ स॒ख्ये॒ त॒व॑॑ म॒ह॒ते॒ वृ

पं.
५४२

ष्ठोऽअभिचक्ष्यंकृतंपश्येमतुर्वशंयदुम्।सव्यामनुस्फिग्यंवावसेवृ
षानदानोऽअस्यरोषति।मध्वासंपृक्ताःसारघेणधेनवस्तूयमेहिद्र
वापिब।अश्वीरथीसुरूपऽइद्गोमाँ२ऽइदिंद्रतेसखा।श्वात्रभाजावय
सासचतेसदाचंद्रोयातिसभामुपऋश्योनतृष्यन्नवपानमागहि
पिबासोमंवशाँ२ऽअनु।निमेघमानोमघवन्दिवेदिवऽओजिष्ठंदधि
षेसहः॥३१॥अध्वर्य्योद्रावयात्वंसोममिंद्रःपिपासति।उपनूनंयुयु
जेवृषणाहरीऽआचजगामवृत्रहा।स्वयंचित्समन्यतेदाशुरिर्जनो ९
यत्रासोमस्यतृंपसि।इदंतेऽअन्नंयुज्यंसमुक्षितंतस्येहिप्रद्रवापि

ब।रथेष्ठायाध्वर्यवःसोममिंद्रायसोतन।अधिब्रध्नस्याद्रयोविचक्ष
तेसुन्वंतोदाश्वध्वरम्।उपब्रध्नंवावातावृषणाहरीऽइंद्रमपसुवक्ष
तः।अर्वांचंत्वासप्तयोध्वरश्रियोवहंतुसवनेदुप।प्रपूषणंवृणीम
हेयुज्यायपुरूवसुम्।सशक्रशिक्षपुरुहूतनोधियातुजेरायेविमोच
न।३२॥सन्नःशिशीहितुरिजोरिवक्षुरंरास्वरायोविमोचन।त्वेतन्नःसु
वेदमुस्रियंवसुयंत्वंहिनोषिमर्त्यं।वेमित्वापूषन्नृंजसेवेमिस्तोत
वऽआघृणे।नतस्यवेम्यरणंहितद्वसोस्तुषेपज्रायसाम्ने।परागावो
यवसंकच्चिदाघृणेनित्यंरेक्णोऽअमर्त्य।अस्माकंपूषन्नविताशिवोभ

पं॰
५४३

वमंहिष्ठोवाजसातये।स्थूरंराधःशताश्वंकुरुंगस्यदिविष्टिषु।राज्ञस्त्वेष
स्यसुभगस्यरातिषुतुर्वशेष्वमन्महि।धीभिःसातानिकाण्वस्यवाजिनःप्रि
यमेधैरभिद्युभिः।षष्टिंसहस्रानुनिर्म्मजामहेनिर्यूथानिगवामृषिः।वृक्षा
श्चिन्मेऽअभिपित्वेऽअरारणुः।गांभजंतमेहनाश्वंभजंतमेहना॥३३॥ ॥छ॥
इतिएकोनचत्वारिंशोध्यायः॥ ॥ॐ३म्॥दूराद्धिहेवयत्सत्यरुणप्सुरशिश्वि
तत्।विभानुंविश्वधातनत्।नृवद्दस्रामनोयुजारथेनपृथुपाजसा।सचेथेऽ
अश्विनोषसम्।युवाभ्यांवाजिनीवसूप्रतिस्तोमोऽअदृक्षत।वाचंदूतोय
थोहिषे।पुरुप्रियाणऽऊतयेपुरुमंद्रापुरूवसू।स्तुषेकण्वासोऽअश्वि

ऊ३

९८

ना।येभिस्तिस्रःपरीहिष्ठावाजसातमेषयंताशुभस्पती।गंतारादाशुषोगृ
हम्॥१॥तासुदेवायदाशुषेसुमेधामवितारिणीम्।घृतैर्गव्यूतिमुक्षतं
आनःस्तोममुपद्रवत्तूर्यंश्येनेभिराशुभिः।यातमश्वेभिरश्विना।येभि
स्तिस्रःपरावतोदिवोविश्वानिरोचना।त्रींरक्तून्परिदीयथःउतनोगो
मतीरिषउतसातीरहर्विदा।विपथःसातयेसितम्।आनोगोमंतम
श्विनासुवीरंसुरथंरयिम्।वोळ्हमश्वावतीरिषः॥२॥वावृधानाशुभस्प
तीदस्राहिरण्यवर्त्तनी।पिबतंसोम्यंमधु।अस्मभ्यंवाजिनीवसूमघव
द्भ्यश्चसप्रथःछर्द्दिर्य्यंतमदाभ्यम्।निषुब्रह्मजनानांयाविष्ठंतूयमा

पं॰
५४४

गतं। मोष्व१न्याँ२ऽ उपारतम्। अस्य पिबतमश्विना युवं मदस्य चारुणः। म
ध्वो रातस्य धिष्ण्या। अस्मेऽआवहतं रयिं शतवंतं सहस्रिणम्। पुरुक्षुं वि
श्वधायसम्॥३॥ पुरुत्रा चिद्धि वान्नरा विह्वयंते मनीषिणः। वाद्यद्भिरश्वि
ना गतं। जनासो वृक्तबर्हिषो हविष्मंतोऽअरंकृतः। युवां हवंतेऽअश्विना।
अस्माकमद्य वामयं स्तोमो वाहिष्ठोऽअंतमः। युवाभ्यां भूत्वश्विना। यो ह वां
मधुनोदृति राहितो रथचर्षणे। ततः पिबतमश्विना। तेन नो वाजिनीव
सू पश्वेतोकाय शंगवे। वहतं पीवरीरिषः॥४॥ उत नो दिव्याऽइषऽउत सिं
धूँरहर्विदा। अपद्वारेव वर्षथः। कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा॥

६६

यद्वां रथो विभिष्यतात्। युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये। शश्वदूती
र्दशस्यथः। ताभिरायातमूतिभिर्न्नव्यसीभिः सुशस्तिभिः। यद्वां वृषण्व
सू ऊवो यथा चित्कण्वमावतं प्रियमेधमुपस्तुतं। अत्रिं शिंजारमश्विना।
५॥ यथोत कृत्व्ये धने शुंगोष्व गस्त्यं। यथा वाजेषु सोभरिम्। एतावद्वां वृष
ण्वसूऽअतो वा भूयोऽअश्विना। गृणंतः सुम्नमीमहे। रथं हिरण्यवंधुरं हि
रण्याभीशुमश्विना। आ हि स्थाथो दिविस्पृशम्। हिरण्ययी वां रभिरीषा
ऽअक्षो हिरण्ययः। उभा चक्रा हिरण्यया। तेन नो वाजिनीवसू परावतश्चि
दागतम्। उपेमां सुष्टुतिं मम॥६॥ आ वहेथे पराकात्पूर्वीरश्नंतावश्विना।

पं॰
५४५

इषोदासीरमर्त्या। आनोद्युम्नैराश्रवोभिरारायायातमश्विना। पुरुश्चंद्रा
नासत्या। एहवांप्रुषितप्सवोवयोवहंतुपर्णिनः। अच्छास्वध्वरंजनं। रथंवा
मनुगायसंयऽइषावर्त्ततेसह। नचक्रमभिबाधते। हिरण्ययेनरथेन
द्रवत्पाणिभिरश्वैः। धीजवनानासत्या॥७॥ युवंमृगंजागृवांसंस्वदथोवा
वृषण्वसू। तानःपृङ्मिषारयिम्। तामेऽअश्विनासनीनांविद्यातंनवानाम्। वि॰
यथाचिच्चैद्यःकशुःशतमुष्ट्रानांददत्सहस्रादशगोनाम्। योमेहिरण्य
संदृशोदशराज्ञोऽअमंहत। अधस्पदाइच्चैद्यस्यकृष्टयश्चर्म्मम्नाऽअभि
तोजनाः। माकिरेनापथागाद्येनेमेयंतिचेदयः। अन्योनेत्सूरिरोहतेभूरि

१००

दावत्तरोजनः॥८॥ महाँ२ऽइंद्रोयऽओजसापर्जन्योवृष्टिमाँ२ऽइव। स्तोमै
र्वत्सस्यवावृधे। प्रजामृतस्यपिप्रतःप्रयद्भरंतवह्नयः। विप्राऽऋतस्यवा
ऋ हसा। कण्वाऽइंद्रंयदक्रतस्तोमैर्यज्ञस्यसाधनम्। जामिब्रुवतऽआयुधम्। व
समस्यमन्यवेविशोविश्वानमंतकृष्टयः। समुद्रायेवसिंधवः। ओजस्त
दस्यतित्विषऽउभेयत्समवर्त्तयत्। इंद्रश्चर्म्मेवरोदसी॥९॥ विचिद्वृत्र
स्यदोधतोवज्रेणशतपर्वणा। शिरोबिभेदवृष्णिना। इमाऽअभिप्रणो
नुमोविपामग्रेषुधीतयः। अग्नेःशोचिर्न्नदिद्युतः। गुहासतीरुपत्मनाप्र
छो य[illegible]चंतधीतयः। कण्वाऽऋतस्यधारया। प्रतमिंद्रनशीमहिरयिंगोमं

पं.
५४६

तमश्विनम्। प्रब्रह्मपूर्वचित्तये। अहमिद्धि पितुष्परि मेधामृतस्य जग्र
भ। अहं सूर्यऽइवाजनि॥१०॥ अहं प्रत्नेन मन्मना गिरः शुंभामि कण्वव
त्। येनेंद्रः शुष्ममिद्दधे। ये त्वामिंद्र तुष्टुवुर्ऋषयो ये च तुष्टुवुः। ममेद्व
र्द्धस्व सुष्टुतः। यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन्। अपः समुद्रमैरय
त्। निशुष्णऽइंद्र धर्णसिं वज्रं जघंथ दस्यवि। वृषा ह्युग्र शृण्विषे। न द्यावऽ
इंद्र मोजसा नांतरिक्षाणि वज्रिणम्। न विव्यचंत भूमयः॥११॥ यस्तऽइं
द्र महीरपस्तभूयमानऽआशयत्। नितंपद्यासु शिश्नथः। यऽइमे रोद
सी मही समीची समग्रभीत्। तमोभिरिंद्र तं गुहः। यऽइंद्र यतयस्त्वा भृ

१०१

गवो ये च तुष्टुवुः। ममेदुग्र श्रुधी हवम्। इमास्तऽइंद्र पृश्नयो घृतं दुह
तऽआशिरम्। एनामृतस्य पिप्युषीः। याऽइंद्र प्रस्वस्त्वा सा गर्भमच
क्रिरन्। परि धर्मेव सूर्य्यम्॥१२॥ त्वामिच्छवसस्पते कण्वाऽउच्छेन वावृ
धुः। त्वां सुतासऽइंदवः। तवेदिंद्र प्रणीतिषूत प्रशस्तिरद्रिवः। यज्ञो वितं
तसाय्यः। आनऽइंद्र महीमिषं पुरं न दर्षि गोमतीम्। उत प्रजां सुवीर्य
म्। उत त्यदाश्वश्व्यं यदिंद्र नाहुषीष्वा। अग्रे विक्षु प्रदीदयत्। अभि व्र
जं न तत्निषे सूरऽउपाकचक्षसं। यदिंद्र मृलयासिनः॥१३॥ यदंग तवि
षीयसऽइंद्र प्रराजसि क्षितीः। महाँ२ऽअपारऽओजसा। तं त्वा हविष्मती

पं. वि
५४७

शऽउपब्रुवतऽऊतये। उरुज्रयसमिंदुभिः। उपह्वरे गिरीणां संगथे च
नदीनाम्। धिया विप्रोऽअजायत। अतः समुद्रमुद्वतश्चिकित्वाँ२ऽअव
पश्यति। यतो विपानऽएजति। आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यंति वा
सरम्। परो यदिध्यते दिवा॥१४॥ कण्वासऽइंद्र ते मतिं विश्वे वर्द्धंति पौंस्य
म्। उतोशविष्ठ वृष्ण्यम्। इमाम्मऽइंद्र सुष्टुतिं जुषस्व प्रसुमामव। उत
प्रवर्द्धया मतिम्। उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः। विप्राऽअतक्ष्म
जीवसे। अभि कण्वाऽअनूषतापो न प्रवतायतीः। इंद्रं वनन्वती मतिः
इंद्रमुत्छानि वावृधुः समुद्रमिव सिंधवः। अनुत्तमन्युमजरम्॥१५॥

१०२

आनो याहि परावतो हरिभ्यां हर्यताभ्याम्। इममिंद्र सुतं पिब।
नुत्तमन्यु त्वामिद्वृत्रहंतमजनासो वृक्तबर्हिषः। हवंते वाजसात
ये। अनु त्वा रोदसीऽउभे चक्रं न वर्त्येतशम्। अनु सुवानासऽइंदवः
मंदस्वा सुस्वर्णरऽउतेंद्र शर्यणावति। मत्स्वा विवस्वतो मती। वावृ
धानऽउपद्यविवृषा वज्र्यरोरवीत्। वृत्रहा सोमपातमः॥१६॥ ऋषि
र्हि पूर्वजाऽअस्येकऽईशानऽओजसा। इंद्र चोष्कूयसे वसु। अस्माकं
त्वा सुताँ२ऽउपवीत पृष्ठाऽअभि प्रयः। शतं वहंतु हरयः। इमां सुपूर्व्यां
धियं मधोर्घृतस्य पिप्युषीम्। कण्वाऽउत्छेन वावृधुः। इंद्रमिद्धि म

पं० ५४८

हीनांमेधेवृणीतमर्त्यः।इंद्रंसनिष्युरूतये।अर्वांचंत्वापुरुष्टुतप्रिय
मेधस्तुताहरी।सोमपेयायवक्षतः।शतमहंतिरिंदिरेसहस्रंपर्शा
वाददे।राधांसिर्यद्वानाम्।त्रीणिशतान्यर्वतांसहस्रादशगोनाम्।द
दुष्यज्रायसाम्ने।उदानट्ककुहोदिवमुष्ट्रांचतुर्युजोददत्।श्रवसा
र्याद्वंजनम्॥१७॥प्रयद्वस्त्रिष्टुभमिषंमरुतोविप्रोऽअक्षरत्।विपर्वते
षुराजथ।यदंङ्गतविषीयवोयामंशुभ्राऽअचिध्वं।निपर्वताऽअहास
त।उदीरयंतवायुभिर्वाश्रासःपृश्निमातरः।धुक्षंतपिप्युषीमिषम्।व
पंतिमरुतोमिहंप्रवेपयंतिपर्वतान्।यद्यामंयांतिवायुभिः।निय

१०३

द्यामायवोगिरिर्न्निसिंधवोविधर्म्मणे।महेशुष्माययेमिरे॥१८॥
इत्यर्द्धः॥युष्माँ२ऽउनक्तमूतयेयुष्मांदिवाहवामहे।युष्मान्प्रयत्यध्व
रे।उदुत्येऽअरुणप्सवश्चित्रायामेभिरीरते।वाश्राऽअधिष्णुनादि
वः।सृजंतिरश्मिमोजसापंथांसूर्य्याययातवे।तेभानुभिर्वितस्थिरे।इ
मांमेमरुतोगिरमिमंस्तोममृभुक्षणः।इमंमेवनताहवम्।त्रीणिस
राँसिपृश्नयोदुदुह्रेवज्रिणेमधु।उत्संकवंधमुद्रिणम्॥१९॥मरुतोय
द्धवोदिवःसुम्नायंतोहवामहे।आतूनऽउपगंतन।यूयंहिष्ठासुदान
वोरुद्राऽऋभुक्षणोदमे।उतप्रचेतसोमदे।आनोरयिंमदच्युतंपु

पं॰
५४९

रुहुं विश्वधायसम्। इयर्त्ता मरुतो दिवः। अधीवयज्जिरीणां यामं शु
भ्राऽअचिध्वम्। सुवानैर्मंदध्वऽइंदुभिः। एतावतश्चिदेषां सुम्नं भिक्षे
त मर्त्यः। अदाभ्यस्य मन्मभिः॥२०॥ ये द्रप्साऽइव रोदसी पमंत्यनुवृ
ष्टिभिः। उत्संदुहंतोऽअक्षितं। उदुस्वानेभिरीरतऽउद्रथैरुदुवायुभिः।
उत्स्तोमैः पृश्निमातरः। येनावतुर्वशं यदुं येन कण्वं धनस्पृतम्। राये
सुतस्य धीमहि। इमाऽउवः सुदानवो घृतन्न पिप्युषीरिषः। वर्द्धान्काण्व
स्य मन्मभिः। क्व नूनं सुदानवो मदथा वृक्तबर्हिषः। ब्रह्माको वः सपर्य
ति। नहि ष्मयद्धवः पुरा स्तोमेभिर्वृक्तबर्हिषः। शिद्धाँ२ऽऋतस्य जिन्वथ। स
२१

२०४

र्व

मुत्ये महतीरपः संक्षोणी समुसूर्य्यम्। संवज्रं पर्वशो दधुः। विवृत्रं प
र्वशो ययुर्विपर्वताँ२ऽअराजिनः। चक्राणा वृष्णिपौंस्यम्। अनुत्रितस्य
युध्यतः शुष्ममावन्नुतक्रतुम्। अन्विंद्रं वृत्रतूर्य्ये। विद्युद्धस्ताऽअभि
द्यवः शिप्राः शीर्ष्षन्हिरण्ययीः। शुभ्रा व्यंजत श्रिये॥२२॥ उशना यत्परा
वतऽउक्ष्णो रंध्रमयातन। द्यौर्न्न चक्रदद्भिया। आ नो मखस्य दावनेश्वै
र्हिरण्यपाणिभिः। देवासऽउपगंतन। यदेषां पृषती रथे प्रष्टिर्वहति
रोहितः। यांति शुभ्रा रिणन्नपः। सुषोमे शर्यणावत्यार्ज्जीके पस्त्याव
ति। ययुर्न्नि चक्रया नरः। कदा गच्छाथ मरुतऽइत्था विप्रं हवमानम्

पं॰
५५०

माडीकेभिर्नाधमानम्॥२३॥ कद्धनूनं कद्यप्रियो यदिंद्रमजहातन। कोवः
सखित्वऽओहते। सहोषुणो वज्रहस्तैः कण्वासोऽअग्निं मरुद्भिः। स्तुषे
६ हिरण्यवाशीभिः। ओषुकृष्णः प्रयज्यूनानव्यसे। सुविताय। ववृत्यां चित्र
वाजान्। गिरयश्चिन्निजिहते पर्शानासो मन्यमानाः। पर्वताश्चिन्नियेमि
रे। आक्ष्णयावानो वहत्यंतरिक्षेण पततः। धातारस्तुवते वयः। अग्निर्हि
छं३ जानि पूर्व्यश्छंदो न सूरोऽअर्चिषा। तेनानुभिर्वितस्थिरे॥२४॥ आनो विश्वा
भिरूतिभिरश्विना गच्छतं युवम्। दस्रा हिरण्यवर्त्तनी पिबतं सोम्यं मधु। १०५
आ नूनं यातमश्विना रथेन सूर्यत्वचा। भुजी हिरण्यपेशसा कवी गंभीर

चेतसा। आयातं नहुषस्पर्यांतरिक्षात्सुवृक्तिभिः। पिबाथोऽअश्विना म
धु कण्वानां सवने सुतं। आनो यातं दिवस्पर्य्यांतरिक्षादधप्रिया। पुत्रः क
ण्वस्य वामिह सुषाव सोम्यं मधु। आनो यातमुपश्रुत्यश्विना सोमपीतये।
स्वाहा स्तोमस्य वर्द्धना प्रकवी धीतिभिर्न्नरा॥२५॥ यच्चिद्धि वां पुरुऽऋष
यो जुहूरेव सेनरा। आयातमश्विना गतमुपेमां सुष्टुतिं मम। दिवश्चिद्रो
चनादध्यानो गंतं स्वर्विदा। धीभिर्वत्स प्रचेतसा स्तोमेभिर्हवनश्रुता। कि
मन्ये पर्य्यासते स्मत्स्तोमेभिरश्विना। पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सोऽ
अवीवृधत्। आवां विप्रऽइहावसे ह्वत्स्तोमेभिरश्विना। अरिप्रावृत्रहं

तमाता नो नूतंमयोनुवा॒ आय॑दांयोषणा रथमति॒ष्ठद॑श्विनावस्रविधा
न्यश्विनायुवंप्रधीतान्यगच्छतम्॥२॥ अतःसहस्रनिर्णिजारथेनायातम
श्विनावत्रिभ्यांमधुमद्वोशंसात्काव्यःकविनपुरुमंहापुरुवसुर्मनोतरा
यीणम्॥स्तोमंमेऽअश्विनाविमममिवक्षोऽअनूषाताम्॥आनोविश्वान्य
श्विनाधत्तंराधांस्यक्षया॥छतन्त्रऽऋत्वियावतोमानोरीरधतंनिदोयत्रास
त्यापरावतियद्यास्थोऽअध्वंवराअतःसहस्रनिर्णिजारथेनायातमश्विना
योवांनासत्याकृविर्ग्रीर्वसोऽअवोवृधत्॥तस्मैसहस्रनिर्णिजमिषंधत्तं ९६
घृतश्चुतम्॥३॥यास्माऽऊर्जंघृतश्चुतमश्विनायछतंयुवम्॥योवांसुना

यज्ञऽइवद्रुसूयाद्दानुनस्यतो॥आनोगंतंरिशादसेमंस्तोमंपुरुजुजाऽ
तनऽसुश्रियोनरेमादयतमनिष्टये॥आवांविश्वाभिरूतिभिःप्रियमेधाऽ
अरूषतारातिषाचधरायेमश्विनायामरुतिषु॥आनोगंतंमयोभुवाश्वि
नाशंभुवायुवमूयोवांविपन्यूधीतिर्गिर्वसोऽअवोवृधत्॥यानिःक
एवंमेधातिथिंयानिर्वशंदशव्रजमाँआनिःघृतस्नाँरऽअश्विनाप्रावतंवा
ऊसातयेप्रवांस्तोमाःसुवृक्तयोगिरोवर्धन्त्यश्विना॥पुरुत्रावृत्रहंतमा
नोनूतंपुरुस्पृहाऽत्रालिप्तंदान्यश्विनोरविःसांतियुक्तपरःकविऽअत
स्यपत्मन्निरवोद्गीर्विन्यस्यति॥४॥आनूनमश्विनायुवंवक्षस्यगंतमव

यानिर्गोशर्यमावतंतानिर्नोवतंनरा॥५॥यानिर्नरावसदस्मावतंरुत्येधनेऽ॥

सो॒ग्नास्मै॑ यछतमवृ॒कं पृ॑थु॒छर्दि॒र्युवं॑या उ॒ आत॑यः॒ यद॑न्तरि॒क्ष्य
दि॒वियत्पंच॑मानुषो॒ऽश्नु॒ग्नास्मै॑ यछतमवृ॒कं पृ॑थु॒छ॑र्दिः॒ नृ॒मणं॑तद्ध॒त
मश्विना॒ येवां॑दं॒सांस्य॒श्विना॒ विश्रा॑सः॒ परि॑मामृ॒क्षुः॒ एवेत्का॒ एव॑स्य॒बोध
तम्॒ अ॒यंवां॑ घ॒र्मोऽश्विना॒स्तोमे॑न॒ परि॑षिच्यते॒ अ॒यंसो॒मो॒ मधु॑मान्वा॒जि
नी॑वस्॒येन॑वृत्रं॒ चित॑थः॒ यद्भृ॒गवो॑ द्रु॒ह्यन्त॒ऽउ॒ यद्धो॑ष॒धीषु॒रुदं॑ससाद्भृ॒त
म्॒ तेन॑मावि॒ष्टम॒श्विना॒श्॥ यन्नासत्या॒भुर॑ण्यथो॒ यद्वा॑ दे॒व॒निष्ठ्यथः॑॥
अ॒यंवां॑ व॒सो॒मति॒र्नि॑र्विं॒धते॒ऽवि॒ष्मं॑तं॒ दिगल॑थ॒॥ आ॒नू॒नम॒श्विनो॒र्ऋ॑षिः॑
स्तो॒मं॑चि॒क्रेत॑वा॒मया॒॥ आसो॒मं॑मधु॒मन्त॑मं॒ घर्म॑ꣳसिञ्चा॒दथ॑र्वणि॒॥ आ॒नू॒नं॑

र॒घु॒व॒र्त्ति॒नि॑र्य॒तिष्ठ॑थो॒ऽश्विना॒ आ वां॑स्तो॒मा॒ऽइ॒मे मम॒ नमो॒ न चु॑च्य
वीरत॒॥ यद्ध॒ वान्ना॑सत्यो॒ऽऊ॒रा चु॒च्यु॒वी॒म॒हि॒॥ यद्वा॑ कृ॒ष्टिषु॒ मद्र्यङ्॒ नि॒र॒श्विने॒वेत्का
एव॑स्य॒बोध॒तम्॒ यद्वाँ॑ कक्ष्री॒वाँऽउ॒त॒ यद्व॒ꣳश्यः॒ ऋषि॒र्यद्वां॑दी॒र्घत॑मा॒ज॒
हा॒वृ॒षा॒ यद्वां॑ वे॒न्यः॒ सा॒द॒ने॒ष्वे॒दतो॑ऽश्विना॒ चे॒त॒ये॒था॒म्॒॥३॥ यातं॑ छ
र्दि॒ष्पा॒ऽउ॒त॒ नः॒ प॒र॒स्या॒ नू॒तं॑ऽउ॒ग॒त्याऽउ॒त॒ न॒स्त॒नू॒पा॒ वर्त्ति॑स्तो॒का॒य॒ त॒न॒या
य॒या॒त॒म्॒ यदि॑ꣳ ए॒ण॒सा॒ र॒थं॒या॒थो॒ऽश्विना॒ य॒द्वा॒ पु॒रा॒ न॒व॒थः॒ स॒मो॒क॒सा॒
यद्वा॑दित्ये॒भि॒र्ऋ॒तु॒भि॒ः स॒ꣳजो॒ष॒सा॒ य॒द्वा॒ वि॒ष्णो॒ वि॒क्र॒मे॒षु॒ति॒ष्ठ॒थः॒ य
द्वा॒श्विना॒वू॒ꣳ ऊ॒वे॒य॒वा॒ज॒सा॒ते॒ यत्पृ॑त्सु॒ दु॒र्व॒णे॒स॒ह॒स्त॒ꣳ श्रे॒ष्ठ॒म॒श्विने॒

पं.
५५३

वां

रवः। आ नूनं यातमश्विनेमा हव्यानि हिता। इमे सोमासोऽअधि तुर्वशे य
दाविमे कण्वेषु वामथ। यन्नासत्या पराकेऽअर्वाकेऽअस्ति भेषजं। तेन
नूनं विमदाय प्र[illegible]चेतसा छर्द्दिर्वत्साय यच्छतम्॥३२॥ अभुत्स्यु प्रदे
व्यासाकं वाचाहमश्विनोः। व्यावर्द्देव्यामतिं विरातिं मर्त्येभ्यः। प्र बोधयो
षोऽअश्विना प्र देवि सूनृते महि। प्र यज्ञहोतरानुषक् प्र मदाय श्रवो
बृहत्। यदुषो यासि भानुना संसूर्येण रोचसे। आ हायमश्विनो रथो
वर्त्तिर्याति नृषाय्यम्। यदा पीतासोऽअंशवो गावो न दुह्रऽऊधभिः। य
द्वा वाणीरनूषत प्र देवयंतोऽअश्विना। प्र द्युम्नाय प्र शवसे प्र नृषाह्या

१०८

य शर्म्मणे। प्र दक्षाय प्रचेतसा। यन्नूनं धीभिरश्विना पितुर्य्योना निषीदथः। य
द्वा सुम्नेभिरुच्यो॥३३॥ यत्स्थो दीर्घप्रसद्मनि यद्वा दो रोचने दिवः। यद्वा स
मुद्रेऽअध्याकृते गृहेतऽआयातमश्विना। यद्वा यज्ञं मनवे संमिमिक्षथुरे
वेत्काण्वस्य बोधतम्। बृहस्पतिं विश्वान्देवाँ२ऽअहं हुवऽइंद्राविष्णूऽअश्वि
ना वाशुहेषसा। त्यान्वश्विना हुवे सुदंससा गृभे कृता। ययोरस्ति प्रणः स
ख्यं देवेष्वध्याप्यम्। ययोरधि प्र यज्ञाऽअसूरे संति सूरयः। ता यज्ञस्याध्व
रस्य प्रचेतसा स्वधाभिर्य्या पिबतः सोम्यं मधु। यदद्याश्विनावपाग्यत्प्रा
क्स्थो वाजिनीवसू। यद्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मागतं। यदं

पं॰
५५४

तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसीऽअनु। यद्वा स्वधाभिरधि तिष्ठथो रथ
मतऽआयातमश्विना॥३४॥ त्वमग्ने व्रतपाऽअसि देवऽआमर्त्येष्वा। त्वं यज्ञे
ष्वीड्यः। त्वमसि प्रशस्यो विदथेषु सहंत्य। अग्ने रथीरध्वराणाम्। स त्वमस्म
दप द्विषो युयोधि जातवेदः। अदेवीऽअग्नेऽअरातीः। अंति चित्संतमह यज्ञं
मर्त्तस्य रिपोः। नोपवेषि जातवेदः। मर्त्ताऽअमर्त्यस्य ते भूरि नाम मनामहे। वि
प्रासो जातवेदसः॥३५॥ विप्रं विप्रासो वसे देवं मर्त्तास ऊतये। अग्निं गीर्भिर्ह
वामहे। आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वां कामया गिरा॥
पुरुत्रा हि सदृङ्ङसि विशो विश्वाऽअनु प्रभुः। समत्सु त्वा हवामहे। समत्स्वग्नि

१०९

पं॰
५५५

मवसे वाजयंतो हवामहे। वाजेषु चित्रराधसम्। प्रत्नो हि कमीड्योऽअध्वरे
षु सनाच्च होता नव्यश्च सत्सि। स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभग
मा यजस्व॥३६॥छ॥ ॥इति चत्वारिंशोध्यायः॥ ॥श्रीरस्तु॥ ॥ ॥

११०

॥इतिपंचमाष्टकसमाप्तोयं॥ख॥पत्रे ५५५